"तद्युक्तं विपरीतकारिणि तव श्रीखण्डचर्च्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीड़ामुदो यातनाः ॥")

श्रीगर्भः, पुं, (श्रीर्गर्भोऽस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥ खड्गः । यथा,—
"असिर्व्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्म्मपाल नमोऽस्तु ते ॥"
इति तिथ्यादितत्त्वम् ॥

श्रीग्रहः, पुं, (श्रियः ग्रहो यत्र ।) पक्षिणः पानीयशाला । तत्पर्य्यायः । शकुनिप्रपा २ । इति हारावली ॥

श्रीघनं, क्ली, (श्रिया घनम् ।) दधि । इति जटाधरः ॥

श्रीघनः, पुं, (श्रिया बुद्धा घनः ।) बुद्धः । इत्यमरः ॥

श्रीचक्रं, क्ली, (श्रियाश्चक्रम् ।) त्रिपुरसुन्दर्य्याः पूजायन्त्रविशेषः । यथा,—
"श्रीचक्रस्योद्धृतिं वक्ष्ये तव पूजाप्रसिद्धये ।
विन्दुगर्भं त्रिकोणन्तु कृत्वा चाष्टारमुद्धरेत् ॥
दशारद्वयमन्वस्राष्टारषोड़शकोणकम् ।
त्रिरेखात्मकभूगेहवेष्टितं यन्त्रमालिखेत् ॥"
इति मन्त्रमहोदधौ ११ तरङ्गः ॥

अपिच । अथ श्रीचक्रम् । यथा विन्दुमत् त्र्यस्र अष्टकोणं एतत्त्रयं संहारचक्रम् । द्विदशारं चतुर्द्दशारं स्थितिचक्रमेतत्त्रयम् । अष्टपत्रं षोड़शदलं वृत्तत्रयम् । भूसदनत्रयं चतुर्द्वारसमायुक्तमेतत् सृष्टात्मकम् । तदुक्तं यामले ।
"विन्दुत्रिकोणवसुकोणदशारयुग्म-
मन्वस्रनागदलसङ्गतषोड़शारम् ।
वृत्तत्रयञ्च धरणीसदनत्रयञ्च
श्रीचक्रराजमुदितं परदेवतायाः ॥"

चक्रराजं सिन्दूरकुङ्कुमादिना लिखितं सुवर्णरजतपद्मरत्नस्फटिकताम्राद्युत्कीर्णं कुर्य्यात् । तथा भूतभैरवतन्त्रे ।
"अकृत्वा सुसमां रेखां नालिख्य सुसमं सुखम्
योऽत्र यन्त्रे प्रवर्त्तेत तस्य सर्व्वं हराम्यहम् ॥
यस्या यत्र स्थितिर्द्देवि तत्र तां नार्च्चयेद्यदि ।
तन्मांसरुधिरेणैव पारणा तस्य जायते ॥
पद्मोरालोकनं न स्यात्तथा कुरुत यत्नतः ।
यदि दैवात् पद्मोरग्रे लिखितं विद्यते क्वचित् ।
ममाङ्गक्षतिरेवात्र क्रियते पापबुद्धिना ॥"
तथा भूतभैरवे ।
"योऽस्मिन् यन्त्रे महेशानि केशराणि प्रकल्पयेत्
योगिनीसहितास्तस्य हिंसां कुर्व्वन्ति भैरवाः ॥"
इति वचनादत्र केशराणि ।
"न रात्रावर्च्चयेत् यन्त्रं साधकस्तु कदाचन ।
प्रमादादर्च्चिते यन्त्रे शापो भवति तत्क्षणात् ॥
तत्रापराजितापुष्पे करवीरे जवासु च ।
तत्र देवी वसेन्नित्यं तद्यन्त्रे पूजनं मम ॥"
तथा स्वच्छन्दभैरवे ।
"कुर्य्याच्च स्थण्डिले यन्त्रं हस्तमात्रं सुसुन्दरम् ।
रत्नादिषु च निर्म्माणे मानमिच्छावशाद्भवेत् ॥
एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम् ।
इतोऽधिकं नरः कृत्वा प्रायश्चित्तीभवेत् ध्रुवम् ॥
रक्तेन रजसापूर्य्य श्रीचक्रं भुवि पूजयेत् ।
नश्यन्ति सर्व्वविघ्नानि प्राप्यते च यथेप्सितम् ॥
दशभागं सुवर्णस्य ताम्रस्य द्वादशं तथा ।
षड़्दशं रजतस्याथ चैतल्लोहत्रयं भवेत् ॥
चक्रेऽस्मिन् पूजयेद्यो हि स सौभाग्यमवाप्नुयात्
अणिमाद्यष्टसिद्धीनामधिपो जायतेऽचिरात् ॥
विद्रुमे रचिते यन्त्रे पद्मरागेऽथवा प्रिये ।
इन्द्रनीलेऽथ वैदूर्य्ये स्फाटिके मरकतेऽपि वा ।
धनं पुत्त्रं तथा दारान् यशांसि लभते ध्रुवम् ।
ताम्रन्तु कान्तिदं प्रोक्तं सुवर्णं शत्रुनाशनम् ॥
राजतं क्षेमदञ्चैव स्फाटिकं सर्व्वसिद्धिदम् ॥"
एतदद्यन्त्रमात्रे ज्ञेयम् ॥ * ॥ अथ श्रीचक्रनाशे प्रायश्चित्तम् ।
"दग्धं च स्फुटितं यन्त्रं हृतं चौरेण वा प्रिये ।
उपवासं प्रकुर्व्वीत दिनमेकमतन्द्रितः ॥
लक्षमात्रं जपेद्विद्यां होमतर्पणपूर्व्वकम् ।
सङ्कत्या च गुरुं तोष्य ब्राह्मणानपि भोजयेत् ॥"
लक्षं जप्त्वा दशांशहोमः तद्दशांशश्च तर्पणम् । लक्षमयुतमित्येके ।
"कदाचिल्लुप्तचिह्नं वा स्फुटितादि विदूषणम्
भग्नं करोति यो मर्त्यो मृत्युस्तस्य द्रुतं भवेत्
तस्माच्च तीर्थराजे वा गङ्गादिसरितां वरे ॥
समुद्रे वा क्षिपेद्देवि चान्यथा दुःखमाप्नुयात् ॥"
इदन्तु यन्त्रमात्रविषयम् ॥ * ॥ अथ श्रीचक्रपादोदकमाहात्म्यम् ।
"गङ्गापुष्करनर्म्मदासु यमुनागोदावरीगोमती-
गङ्गाद्वारगयाप्रयागवदरीवाराणसीसिन्धुषु ।
रेवासेतुसरस्वतीप्रभृतिषु ब्रह्माण्डभाण्डोदरे
तीर्थस्नानसहस्रकोटिफलदं श्रीचक्रपादोदकम्"
अथ दर्शनफलम् ।
"सम्यक् शतक्रतून् कृत्वा यत् फलं समवाप्नुयात्
तत् फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनम् ॥
षोड़शं वा महादानं कृत्वा यल्लभते फलम् ।
तत् फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनम् ॥
सार्द्धत्रिकोटितीर्थेषु स्नात्वा यत् फलमश्नुते ।
तत् फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनम् ॥
इति तन्त्रसारः ॥

श्रीजः, पुं, (श्रियः जायते इति । जन् + डः ।) कामदेवः । श्रिया जातत्वात् । शाम्बः । इति केचित् ॥

श्रीतालः, पुं, (श्रीयुक्तस्तालः ।) तालवृक्षसदृशवृक्षविशेषः । तत्पर्य्यायः । मृदुतालः २ लक्ष्मीतालः ३ मृदुच्छदः ४ विशालपत्रः ५ लेखार्हः ६ मसीलेख्यदलः ७ शिरालपत्रकः ८ याम्योद्भूतः । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । ईषत् कषायत्वम् । पित्तनाशित्वम् । कफकारित्वम् । ईषद्वातप्रकोपणत्वञ्च । इति राजनिर्घण्टः ॥

श्रीदः, पुं, ( श्रियं ददातीति । दा + कः । ) कुबेरः । इत्यमरः ॥ शोभादातरि, त्रि, ॥

श्रीधरः, पुं, (धरतीति । धृ + अच् । श्रिया धरः ।) विष्णुः । (यथा, मुकुन्दमालायाम् ।८।
"मा भैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातना
नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥"
भूतार्हद्भेदः । इति हेमचन्द्रः ॥ शालग्रामचक्रे, क्ली, । यथा,—
"अतिक्षुद्रं द्विचक्रन्तु वनमालाविभूषितम् ।
श्रीधरं देवि विज्ञेयं श्रीप्रदं गृहिणां सदा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥

श्रीनन्दनः, पुं, (श्रियाः नन्दनः ।) कामदेवः । इति हेमचन्द्रः ॥ लक्ष्मीपुत्त्रश्च ॥

श्रीनिकेतनः, पुं, (श्रियं निकेतयति वासयतीति । नि + कित + णिच् + ल्युः । ) विष्णुः । इति शब्दरत्नावली ॥ (यथा, भागवते । ८।१८।१३ ।
"भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥"
श्रियः आश्रयस्थाने, त्रि । यथा, भागवते । ३ । ३ । २० ।
"स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया ।
चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ॥")

श्रीनिवासः, पुं, (श्रियो निवास आश्रयस्थानम् । विष्णुः । इति त्रिकाण्डशेषः ॥

श्रीपं, त्रि, (श्री + पा + कः ।) श्रियं पाति यत् । इति मुग्धबोधव्याकरणम् ॥

श्रीपञ्चमी, स्त्री, ( श्रियः सरस्वत्याः पञ्चमी । ) माघशुक्लपञ्चमी । यथा,—
"चतुर्थी वरदा शुक्ला तत्र गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥
सरस्वतीपूजानध्यायश्चात्र गौड़ाचारः । अत्र श्रीपञ्चम्यामारभ्य प्रतिमासं षड़ब्दसमाप्यं श्रीपञ्चमीव्रतं कुर्व्वन्ति पठन्ति च । इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

श्रीपतिः, पुं, (श्रियः पतिः ।) विष्णुः । इत्यमरः ॥ (यथा, मुकुन्दमालायाम् । १६ ।
"सेव्यः श्रीपतिरेव सर्व्वजगतामेकान्ततः साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः ॥")
पृथिवीनाथः । इति मेदिनी ॥

श्रीपथः, पुं, (श्रियः पन्थाः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) राजपथः । इति हेमचन्द्रः ॥

श्रीपर्णं, क्ली, ( श्रीविशिष्टानि पर्णानि यस्य । ) पद्मम् । अग्निमन्थवृक्षः । इति मेदिनी ॥

श्रीपर्णिका, स्त्री, (श्रीपर्णी एव । स्वार्थे कन् । ) कट्फलवृक्षः । इत्यमरः ॥